# कारकाङ्कनसूचनाः एवं निर्देशाः

के. वी. रामकृष्णमाचार्यः, शीतल पोकार, देवानन्द शुक्लः
अग्रिमपरिष्कारः अम्बा कुलकर्णी एवं सञ्जीवः पाञ्चालः

July 17th, 2019

# Contents

**0 कारकसम्बन्धाः** **3**

0.1 कर्ता . . . 3

0.1.1 प्रयोजककर्ता . . . 4

0.1.2 प्रयोज्यकर्ता . . . 4

0.1.3 मध्यस्थकर्ता . . . 5

0.2 कर्म . . . 5

0.2.1 गौणकर्म एवं मुख्यकर्म . . . 6

0.2.2 गतिकर्म . . . 7

0.2.3 वाक्यकर्म . . . 7

0.3 करणम् . . . 7

0.4 सम्प्रदानम् . . . 8

0.5 अपादानम् . . . 8

0.6 अधिकरणम् . . . 8

0.6.1 कालाधिकरणम् . . . 9

0.6.2 देशाधिकरणम् . . . 9

0.6.3 विषयाधिकरणम् . . . 9

**A कारकाङ्कनसम्बन्धाः-2019** **10**

# वाक्याभ्यन्तरः

## 0 कारकसम्बन्धाः


### 0.1 कर्ता

को नाम कर्ता? 'स्वतन्त्रः कर्ता' (1/4/54) क्रियायां स्वातन्त्र्येण विवक्षितार्थः कर्ता इति। कर्ता इत्यत्र 'कर्तृकरणयोस्तृतीया' (2/3/18) इत्यनेन सूत्रेण अनभिहिते कर्तरि तृतीया विभक्तिर्भवति। अभिहिते तु प्रातिपदिकार्थमात्रे कर्तरि प्रथमा विभक्तिर्भवति। यदि कर्तुः योगः कृदन्तेन भवति तर्हि 'कर्तृकर्मणोः कृति' (2/3/65) इत्यनेन कर्तरि षष्ठीविभक्तिर्विधीयते। यदा क्रिया भावलक्षणसप्तम्यन्ता भवति तदा कर्ता सप्तम्यां वा भवेत्।

**रामः पचति।**

1 रामः कर्ता 2

2 पचति





उदाहरणेऽस्मिन् 'स्वतन्त्रः कर्ता' इत्यनेन रामः कर्ता भवति, तत्र अभिहितत्वात् प्रथमाविभक्तिः।

---

**रामेण गम्यते।**

1 रामेण कर्ता 2

2 गम्यते




उदाहरणेऽस्मिन् तु 'स्वतन्त्रः कर्ता' इत्यनेन रामः कर्ता भवति, 'कर्तृकरणयोस्तृतीया' इत्यनेन रामेण इत्यत्र कर्तुः अनभिहितत्वात् तृतीयाविभक्तिः।


---

**रामस्य गमनं भवति।**

1 रामस्य कर्ता 2

2 गमनं कर्ता 3

3 भवति




उदाहरणेऽस्मिन् 'राम' इत्यस्य गमनक्रियायां स्वातन्त्र्यम् अस्ति अतः 'स्वतन्त्रः कर्ता' इत्यनेन स कर्ता भवति, गमनम् इति कृदन्तं पदं वर्तते अतः 'कर्तृकर्मणोः कृति' इत्यनेन राम इत्यत्र कृद्योगे षष्ठीविभक्तिः।

---

**रामे वनं गच्छति सीता अनुसरति।**


1 रामे कर्ता 3

2 वनं कर्म 3

3 गच्छति भावलक्षणसप्तमी_समानकालः 5

4 सीता कर्ता 5

5 अनुसरति




### 0.1.1 प्रयोजककर्ता


**देवदत्तः विश्वामित्रेण ओदनं पाचयति।**

1 देवदत्तः प्रयोजककर्ता 4

2 विश्वामित्रेण प्रयोज्यकर्ता 4

3 ओदनं कर्म 4

4 पाचयति




### 0.1.2 प्रयोज्यकर्ता

सामान्येन प्रयोज्यकर्तरि तृतीयाविभक्तिर्भवति।


यदि अत्र क्रियाः गत्यर्थ-बुद्ध्यर्थ-प्रत्यवसानार्थ-शब्दकर्मक-अकर्मकाः सन्ति तर्हि 'गतिबुद्धिप्रत्यवसानार्थ-शब्दकर्माकर्मकाणामणि कर्ता स णौ' (1/4/52) इत्यनेन सूत्रेण प्रयोज्यकर्तरि द्वितीयाविभक्तिः भवति।

**देवदत्तः विश्वामित्रेण पाचयति।**

1 देवदत्तः प्रयोजककर्ता 3

2 विश्वामित्रेण प्रयोज्यकर्ता 3

3 पाचयति





**माता बालं क्षीरं पाययति।**

1 माता प्रयोजककर्ता 4

2 बालम् प्रयोज्यकर्ता 4

3 क्षीरम् कर्म 4

4 पाययति



### 0.1.3 मध्यस्थकर्ता

प्रयोज्यकर्ता एवं प्रयोजकर्ता इत्यनयोः मध्ये एकः मध्यस्थकर्ता अपि भवितुमर्हति। यथा अस्मिन् वाक्ये

**माता धात्र्या बालं दुग्धं पाययति।**


1 माता कर्ता 5

2 धात्र्या मध्यस्थकर्ता[1] 5

3 बालं प्रयोज्यकर्ता 5

4 दुग्धं कर्म 5

5 पाययति




## 0.2 कर्म


'कर्तुरीप्सिततमं कर्म' (1/4/49) कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात्। यदि कर्म अभिहितं तर्हि तत्र प्रातिपदिकार्थमात्रे प्रथमाविभक्तिर्भवति। यदि अनभिहितं कर्म वर्तते तर्हि कर्मणि द्वितीया(2/3/2) इत्यनेन अनभिहिते कर्मणि द्वितीया विभक्तिः भवति। यदि कर्मणः योगः कृदन्तेन सह वर्तते तर्हि 'कर्तृकर्मणोः कृति' (2/3/65) इत्यनेन सूत्रेण तत्र कृद्योगे कर्मणि षष्ठीविभक्तिः विधीयते।

**रामेण ग्रामः गम्यते।**

1 रामेण कर्ता 3

2 ग्रामः कर्म 3


3 गम्यते




**शत्रून् जयति।**

1 शत्रून् कर्म 2

2 जयति





**रामेण प्रजानाम् शासनं क्रियते।**

1 रामेण कर्ता 4

2 प्रजानाम् कर्म 3

3 शासनम् कर्म 4

4 क्रियते




**इष् धातोः कर्म तुमुन्नन्तं पदम्**


[1] इदानीं यान्त्रिकवाक्यविश्लेणे तावदयं सम्बन्धो न विनियोजिता।

**बालकः पठितुम् इच्छति।**

1 बालकः कर्ता 3

2 पठितुम् कर्म 3

3 इच्छति




कर्मसंज्ञा चात्र ‘धातोः कर्मणः समानकर्तृकादिच्छायाम् वा’ (3/1/7) इति सन्-विधायकसूत्राधारेणावगम्यते।

---

### 0.2.1 गौणकर्म एवं मुख्यकर्म

द्विकर्मकधातूनां विषये एषा कारिका प्रसिद्धा

> दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमन्थ्मुषाम्।
> कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहाम् ॥[2]

अत्र ये धातवः सन्ति तेषां प्रयोगे अकथितं यत् कारकं तस्य कर्मसंज्ञा भवति। सा कर्मसंज्ञा गौणी भवति अतः ‘गौणकर्म’ इति उच्यते। यत् कर्म कर्तुरीप्सिततमत्वेन भवति तत् ‘मुख्यकर्म’ भवति। गौणमुख्यकर्मणः अङ्कनस्य मुख्योद्देश्यः अग्रिमस्तरे यन्त्रस्य शिक्षणे तस्य उपयोगः। पुनश्च कर्मणिप्रयोगे तस्य अपेक्षा विशेषतया भवति।


**गोपालः गां दुग्धं दोग्धि।**

1 गोपालः कर्ता 4

2 गां गौणकर्म 4

3 दुग्धं मुख्यकर्म 4

4 दोग्धि




---


**गोपालेन गौः दुग्धम् दुह्यते।**

1 गोपालेन कर्ता 4

2 गौः गौणकर्म 4

3 दुग्धं मुख्यकर्म 4

4 दुह्यते




---

[2] सिद्धान्तकौमुदी, अकथितं च (1/4/51) इति सूत्रव्याख्याने


**तेन अजा ग्रामं नीयते।**

1 तेन कर्ता 4

2 अजा मुख्यकर्म 4

3 ग्रामं गौणकर्म 4

4 नीयते





### 0.2.2 गतिकर्म

**रामः ग्रामाय गच्छति।**

1 रामः कर्ता 3

2 ग्रामाय गतिकर्म 3

3 गच्छति




### 0.2.3 वाक्यकर्म

**अहं गृहं गमिष्यामि इति सः अवदत्।**

1 अहं कर्ता 3


2 गृहं कर्म 3

3 गमिष्यामि प्रतियोगी 4

4 इति वाक्यकर्म 6

5 सः कर्ता 6

6 अवदत्




## 0.3 करणम्


**बालः कुञ्चिकया तालम् उद्घाटयति।**

1 बालः कर्ता 4

2 कुञ्चिकया करणम् 4

3 तालम् कर्म 4


4 उद्घाटयति



## 0.4 सम्प्रदानम्

**देवदत्तः ब्राह्मणाय गां ददाति।**

1. देवदत्तः कर्ता 4
2. ब्राह्मणाय सम्प्रदानम् 4
3. गाम् कर्म 4
4. ददाति




---


**खण्डिकोपाध्यायः शिष्याय चपेटां ददाति।**

1 खण्डिकोपाध्यायः कर्ता 4

2 शिष्याय सम्प्रदानम् 4

3 चपेटां कर्म 4

4 ददाति





---

## 0.5 अपादानम्

**वृक्षात् पर्णं पतति।**

1. वृक्षात् अपादानम् 3
2. पर्णम् कर्ता 3
3. पतति




---

## 0.6 अधिकरणम्


'आधारोऽधिकरणम्' (1/4/45) कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणं स्यात्। अस्मिन् प्रकरणे अधिकरणं त्रिविधम् - देशाधिकरणम्, कालाधिकरणम् एवं विषयाधिकरणम्। यत्पदं देशं बोधयति तत्पदं यदि अधिकरणे प्रयुज्यते तर्हि तस्य 'देशाधिकरणम्' इति अङ्कनं करणीयम्। यत्पदं कालं बोधयति तत्पदं यदि अधिकरणे प्रयुज्यते तर्हि तस्य 'कालाधिकरणम्' इति अङ्कनं करणीयम्। यत्पदं विषयं बोधयति तत्पदं यदि अधिकरणे प्रयुज्यते तर्हि तस्य 'विषयाधिकरणम्' इति अङ्कनं करणीयम्। एतेषु यदि किमपि पदम् अन्तर्भावितं न भवति तर्हि तत् पदं सामान्यतया 'अधिकरणम्' इति ज्ञातव्यम्, तदनुगुणम् अङ्कनं करणीयम्।

**वानरः वृक्षे वसति।**

1 वानरः कर्ता 3

2 वृक्षे अधिकरणम् 3


3 वसति




---

### 0.6.1 कालाधिकरणम्

**त्रेतायुगे रामः आसीत्।**




1 त्रेतायुगे कालाधिकरणम् 3


2 रामः कर्ता 3

3 आसीत्

---

### 0.6.2 देशाधिकरणम्

**रामः अयोध्यायाम् आसीत्।**




1. रामः कर्ता 3


2. अयोध्यायाम् देशाधिकरणम् 3

3. आसीत्

---

### 0.6.3 विषयाधिकरणम्

**मोक्षे इच्छा अस्ति।**




1. मोक्षे विषयाधिकरणम् 3

2. इच्छा कर्ता 3

3. अस्ति

---

# A कारकाङ्क्षसम्बन्धाः (2019 तमे वर्षे वाक्यविश्लेषणयन्त्रे उपयुक्तानां सम्बन्धानां सूची)

- **कारकसम्बन्धः**
  - कर्ता
    - * प्रयोजककर्ता
    - * प्रयोज्यकर्ता
  - कर्म
    - * मुख्यकर्म
    - * गौणकर्म
    - * वाक्यकर्म
  - करणम्
  - सम्प्रदानम्
  - अपादानम्
  - अधिकरणम्
    - * कालाधिकरणम्
    - * देशाधिकरणम्
    - * विषयाधिकरणम्
- **कारकेतरसम्बन्धः**
  - **क्रियाक्रियासम्बन्धाः**
    - * भावलक्षणसप्तमी_अनन्तरकालः
    - * भावलक्षणसप्तमी_पूर्वकालः
    - * भावलक्षणसप्तमी_समानकालः
    - * पूर्वकालः
    - * वर्तमानसमानकालः
    - * भविष्यत्समानकालः
    - * सहायकक्रिया
  - **क्रियासम्बन्धाः**
    - * सम्बोध्यः
    - * हेतुः
    - * प्रयोजनम्
    - * कर्तृसमानाधिकरणम्
    - * कर्मसमानाधिकरणम्
    - * क्रियाविशेषणम्
    - * प्रतिषेधः
  - **नामनामसम्बनधाः**
    - * षष्ठीसम्बन्धः
    - * अङ्गविकारः
    - * वीप्सा
    - * विशेषणम्
    - * सम्बोधनसूचकम्
    - * विभक्तम्
    - * अभेदः
    - * ल्यप्कर्माधिकरणम्
    - * निर्धारणम्
    - * अत्यन्तसंयोगः
    - * अपवर्ग_सम्बन्धः
    - * वाक्यकर्मद्योतकः
- **उपपदसम्बन्धः**
  - सन्दर्भबिन्दुः
  - तुलनाबिन्दुः
  - विषयाधिकरणम्
  - निर्धारणम्
  - प्रयोजनम्
  - उद्गारवाचकः
  - सह-अर्थः
  - विना-अर्थः
  - स्वामी
  - स्रोतः
- **वाक्येतरसम्बन्धः**
  - अनुयोगी
  - प्रतियोगी
  - नित्य_सम्बन्धः
- **समुच्चयादिसम्बन्धाः**
  - समुच्चितः
  - समुच्चयद्योतकः
  - अन्यतरः
  - अन्यतरद्योतकः